४ सा नैवं समवायसंबंधेन गुणादिमति घटादौ तादृशगुणाद्यभावसत्त्वापत्तिरिति वाच्यं। प्रतियोगितावच्छेदकसंबंधेन
प्रतियोगिसत्त्वस्याभावाभावत्वप्रयोजकत्वात्। अन्यथा समवायेन घटादिमति कपाले संयोगसंबंधावच्छिन्नघटा
द्यभावाभावत्वस्याप्यापत्तेः। एवं प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसत्त्वावच्छेदककालादावेव तदभावाभाव
रूपटा१ प्रसंगो न्यत्रोत्पत्तिकालेपि संयोगसंबंधावच्छिन्नेन तद्रूपस्य तदभावो नास्तीति प्रसंगापत्तेरतो गुणादिमत्स्वपि कालादौ न

46

व्या·टी·
४५

नाहंशस्तु एतादृशभावाभावप्रसञ्जप्रतियोगिकत्वमाशयः। केचित्तु नेदं प्रतियोगितात्वमात्मनिर्वचनं तस्य स्वरूपसंबंध
विशेषरूपत्वात्। किंतु प्रकृतलक्षणघटकप्रतियोगितामात्रनिर्वचनमेव तित्ता अन्योन्याभावव्यधिकरणसंबंधावच्छि
न्नाभावप्रतियोगिनोरव्याप्तिरन्योन्याभावप्रतियोगितावच्छेदकेऽतिव्याप्तिश्च स्तोद्वाय। नैवं प्रकृतलक्षणेऽपि तन्ना
भावपदवैयर्थ्यमिति वाच्यं। तस्य स्वरूपकीर्तनमात्रत्वादित्याहुः। तदसत्। आचार्यस्याव्यभिचारात्मत्वं वैफल्येन तः प्र
तियोगित्वेन प्रतियोगितासामान्यस्यैव निर्वचनात्॥ तस्यां का भिन्नाभिधेये वोपपादने प्रकृतेऽपि सामान्यसल
क्षणत्वेऽपि क्षतिविरहात्। अत्राभावविरहेत्यत्र षष्ठी तत्पुरुषसमासः। षष्ठ्यर्थश्च प्रतियोगित्वं घटकं। तच्च स्वरूपसं
बंधविशेषरूपमेवेति वाच्यं। तथा च लाघवात् अत्रापि तद्विषयप्रतियोगित्वं तत्त्वभावविरहात्मत्वं गोत्वादिसत्त्वरसो वाश
दे नस्यूचितः॥ यत्किंचिदिति॥ यत्किंचित्साध्यव्यापकयत्किंचित्साधनाव्यापकधर्माभावरूपार्थः। तु एवत्वादिसाध्यव्या एम०
मे पकस्य यत्नादिसाधनाव्यापकस्य इत्यत्रादेर्धर्मादेरपसत्त्वादिति भावः। प्रकृतेति। प्रकृतसाध्यव्यापकप्रकृतसाध ४५

न्याव्यापकधर्मश्चेत्यर्थः। निष्ठेत्युमिति। गच्छत्तसाधननिष्ठनिषेधप्रतियोगित्वेनत्यातुमशक्यइत्यर्थः। शंकते
।यावदिति। निषेध्यतद्गति। अनौपाधिकत्वपदेन निषेधप्रतियोगितया बोध्यत इत्यर्थः। यावत्साध्यव्यापकेसा
धनाव्यापकत्वाभावो यावत्साधनाव्यापके साध्यव्यापकत्वाभावो वाऽनौपाधिकत्वपदार्थ इति भावः। व्यधि
करणत्वादिति। निरुक्तनिषेधस्य हेतुनिष्ठसाध्यसामानाधिकरण्यव्यधिकरणत्वादित्यर्थः। तथा च तादृशा
नौपाधिकत्वविशिष्टं साध्यसामानाधिकरण्यं सर्वत्र हेतौ नास्तीत्यव्याप्तिरिति भावः। वैयधिकरण्यमुपपाद
यति। यत्साध्यस्य। यत्साधनसमानाधिकरणसाध्यस्य यत्साधनेस्य यस्य। साधनस्य। तद्धेतौयाधिकत्वं त
था च यावत्स्वाव्यापकाव्यापककसाध्यकत्वं यावत्साध्यव्यापकव्यापककत्वं वाऽनौपाधिकत्वमित्यर्थः। तथा
हीत्यादि। इदं च पर्याप्त्यनभिप्रायेण। यत्साधनतावच्छेदकावच्छिन्नाव्यापकतावच्छेदकं यावत्साध्यतावच्छेदकाव
च्छिन्नाव्यापकतावच्छेदकं तत्त्वं। साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकं यावद्धर्मावच्छिन्नव्यापकतावच्छेद

47

कृत्स्नत्वं वा गम्योपाधिकत्वमित्यर्थः । तुनकोपि दोषः स्ववधेयं ।। नापीति ।। साध्यं प्रागन्ताम व्यभिचारियावदभाववद्वृ त्ति
तावन्नाम व्यभिचारित्वं तावदभाववद्वृत्तित्वं साधनस्य गम्योपाधिकत्वमित्यर्थः । सोपाधौ तु साध्यमुपाधेर्वाव्य
भिचारीन च साधनं तदव्यभिचारेतिन स्याद्वहेतुरिति भावः । नहि लाघवात्साध्याव्यभिचारित्वमेव न दूषित्वमाह ।।
साध्येति ।। अत्रेष्टापत्तेराह ।। नचेति ।। केवलान्वय्यव्याप्तेरिति भावः । ननु तर्हि केव[illegible]न्वयिसंग्रहार्थमेव गुरुशरीरस्या ना४
स्तु केवलक्षणस्यादरोस्त्विति चेन्न ।। अत्र केवलान्वयसंग्रहतादवस्थ्यमिति । तत्र हि साध्यस्य प्रमेयत्वादेर्यद्वृत्तिना
भाववद्वृत्तित्वं तादृशधर्मस्याप्रसिद्धेरिति तद्रूपं । लीलावतीकारमतेपाशक्यानेराकरोति ।। नापीति ।। कार्त्स्न्ये
नेति ।। विशेषणे तनीपातथा यत्कार्त्स्न्येन कार्त्स्न्यविशिष्टेन सर्वेणेति यावत् ।। अत्र कार्त्स्न्ये साधनस्य साध्यस्य
साधनाश्रयस्य साधनसमानाधिकरणधर्मस्य वा विवक्षितं । आद्ये कृत्स्नेन साधनेन साध्यस्य सामानाधिकर एम०
ण्यमित्यर्थः । तत्रैककव्यक्तिकहेतुस्थलेनास्तीत्याह ।। एकव्यक्तिकेति ।। अनेकाधिकरणवृत्तिरूपस्य कार्त्स्न्यस्याभा ४६

वादित्यर्थः। अत्रैव पक्षे दोषांतरमाह। नानेति। न च कालो भेदुसाधने भेदुसाध्यसंबंधस्त्यर्थ इति वाच्यं। तथापि
कालिकसंबंधेन कस्यचिदेवात्मपृथिवीपृथिवीत्वापकजाने। दित्यादावतिव्याप्तेश्च। अर्थापिवक्तुं न पुनरसं धा २
हितोपं निरस्यति।। अन एवेति।। एकव्यक्तिकसाध्यकाभावस्येवेत्यर्थः। विषमव्याप्य इति।। वह्निमान्धूमादित्या
दावित्यर्थः। अयोगोलकीयवह्निसामानाधिकरण्यस्य धूमेऽभावादिति भावः। इदमुपलक्षणं। इत्थंभावग
त्वपरिमाणादित्यादिसमवाये अव्याप्यवृत्तेः। सकलस्य व्याप्यसंबंधस्य गुणत्वापि परिमाणेऽभावादित्यपि बोध्यं।
अर्थपरिष्कारपूर्वकं तत्तदोषं निरस्यति। नचेति। अयेकत्वहेतौ इति। इदमुपलक्षणं। एकमात्रवृत्तिसाध्यकेऽव्या
प्तिश्चेत्यपि द्रष्टव्यं। अर्थपरिष्कारपूर्वकं चतुर्थं निरस्यति।। यावदिति। यावन्तं बुद्धिमधिकरणेति। यावत्सा
धनसमानाधिकरणधर्माधिकरणवृत्तित्वमित्यर्थः। अपनीतेत्यादि।। न च साधनसमानाधिकरणाः यावन्तो
धर्मास्तेषां प्रत्येकनिरूपितसामानाधिकरण्यं विवक्षणीयमिति वाच्यं। धूमसमानाधिकरणानां यावद्भूमीणां

व्यापकत्वं तद्धर्मावच्छिन्नसाध्यमानाधिकरण्यमिति वक्ष्यते तदा नायं दोषः । स्ववधेयम् ॥ टीकाकारलक्षणे व्यापकत्वेनापीति । स्वाभा

विक[illegible]

वि॰ टी॰
४७
महानसत्वादीनां प्रत्येकनिरूपितसामानाधिकरण्यस्यापि कुत्रापि वन्ह्यादावभावादिति भावः । इदं च यथाश्रु
ताभिप्रायेण । यदि तु यद्धर्मावच्छिन्नसामानाधिकरण्यत्वेन साध्यसामानाधिकरण्यमित्यर्थः । व्यभिचारिणि तु
साध्यसामानाधिकरण्यमेवाधिकमिति भावः । स्वाभाविकत्वं हि हेतुस्वरूपजन्यत्वं हेतुस्वरूपाश्रितत्वं वा । आद्ये
द्रव्यं पृथिवीत्वादित्यादौ पृथिवीत्वादिनिष्ठद्रव्यत्वादिसामानाधिकरण्यस्यानित्यतया व्याप्तिः । द्वितीये द्रव्यत्वस
त्वादिसाध्ये अव्यभिचारिण्यपि तत्र व्याप्तिरित्याह । स्वभावेति । स्वभावजन्यहेतुस्वरूपजन्यत्वेन तदाश्रितत्वादेर्वा स्वाभा
विकपदार्थ इति शेषः । व्याप्नोतीति । अव्याप्तिसहितातिव्याप्तेरित्यर्थः । मध्यमपदलोपिसमासात् । अन्यथा द्वंद्वे वि दृ
धेये द्विवचननपुंसकलिङ्गयोरन्यतरापत्तेः स्वदाश्रितत्वादाविस्वादिपदादनारोपितस्य परिग्रहः । तत्रापि द्रव्यत्वसत्वादि
साध्ये अतिव्याप्तिर्बोध्या । समवायाद्द्रव्यत्वसामानाधिकरण्यस्यानारोपितत्वात् ॥ उपाधिनेति । साध्येन भिन्नाः साध्याभा एम०
ववतिभावो वृत्तिर्धर्मस्य तद्भिन्नं साध्याभाववद्वृत्तिकभिन्नं इति यावत् । व्याप्य इति शेषः । अत्यंताभावान्योन्याभावभेदेन ४७

...त्वभावे साध्यभावस्य साध्याभाववन्निष्ठाभावप्रतियोगिना संबंधेनाभावः साध्याभावव्यापकत्वमिति यावत्। तथा च हेतौ साध्याभा
व्यापकाभावप्रतियोगित्वं व्याप्तिरिति निष्कर्षः। ... साध्याभाववन्निष्ठाभावप्रतियोगि ... [illegible] ... नसा ... [illegible]
त्वादिति वाच्यं। तत्र साध्याभाववन्निष्ठाभावप्रतियोगित्वम् अव्यापकत्वं साध्याभाववन्निष्ठाभावप्रतियोगितासंबंधेनाभावत्वमित्येवं ... [illegible]

भेदान्नप्राथमिकाव्यभिचारित्वेनयोनरुक्तो न्याय्येति संबंधमात्रं। साध्यसामानाधिकरण्यमात्रं यत्र यत्सामा
नाधिकरण्यं तत्र तस्य व्याप्तिरितियावत्। नन्वेवं द्रव्यं सत्त्वादित्यादौ सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यस्यापि स
त्तानिष्ठद्रव्यत्वव्याप्तित्वापत्तिरित्यत आह। अव्यभिचारीति। व्यभिचारिहेतुनिष्ठसाध्यसामानाधिकरण्यस्या
पीत्यर्थः। केन चित्सहेति। किंचिद्रूपावच्छिन्नेन साध्येन सहेत्यर्थः। द्रव्यत्वादेरपि जातित्वादिना सत्तादिव्यापकत्वा
दितिभावः। यथाश्रुते सत्तानिष्ठद्रव्यत्वसामानाधिकरण्ये स्वान्येन सह व्याप्तित्वासंभवादसंगतेः। धूमादिव्याप्ति
रित्विति। धूमत्वावच्छिन्ननिष्ठवह्नित्वावच्छिन्नव्याप्तिरित्यर्थः। विशिष्येवेति। धूमत्वावच्छिन्ने वह्नित्वावच्छिन्नस
मानाधिकरण्यं धूमत्वावच्छिन्ने वह्नित्वावच्छिन्नव्याप्तिः। एवं द्रव्यत्वत्वावच्छिन्ने सत्तात्वावच्छिन्नसामानाधिकरण्यं
द्रव्यत्वत्वावच्छिन्ने सत्तात्वावच्छिन्नव्याप्तिरित्यादिक्रमेण विशिष्येव निर्वक्तव्येत्यर्थः। ननु तद्धर्मावच्छिन्ने तद्धर्मावच्छि
न्नसामानाधिकरण्यं तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नव्याप्तिरिति सामान्यतोऽयत्रोप्यामेकोन्या निर्वक्तव्या तेन व्याप्ति

49

चारिणा नातिव्याप्तिरिति भावः। ननु किमिदं व्याप्तेर्लक्षणं किं वानुमितिकारणीभूतपरामर्शविषयतावच्छेदकं व्याप्तिपदप्रवृत्तिनिमित्तं वा आद्य आह ... लिंगेति। द्वितीये आह। नचेति। संबंधमात्रं। सामानाधिकरण्यत्वावच्छिन्न मात्रं। तं थ्या। अनुमितिहेतुपरामर्शविषयः। नहेत्वादिति॥ अव्यभिचारं धूमज्ञानदशायां वन्ह्यव्यभिचार्यभाववान् पर्वतः वन्ह्यव्यभिचार्यभाववद्व्याप्यवान्पर्वत इत्यादिज्ञानदशायां वा वह्निसमानाधिकरणधूमवान्पर्वत इति साम नाधिकरण्यविशिष्टपरामर्शादनुमित्यनुदयादित्यर्थः। नचाव्यभिचारं धूमज्ञानदशायामनुमित्यनु[illegible]त्पादेऽसिद्धः न था वन्ह्यव्यभिचार्यभाववान्पर्वत इत्यादिज्ञानदशायामपि· अस्तु वा पक्षे साध्याव्यभिचार्यभावादिज्ञानाभावोऽप्यनु मितिहेतुरिति वाच्यं। सर्वजनानुभवबाधितत्वात्। साध्याव्यभिचार्यभाववद्व्याप्यादिज्ञानानामनुमितिप्रतिबंधक त्वकल्पने महागौरवाच्चेति भावः। तृतीये अर्थांतरे समेवाह। नापीति। केषांचिन्मतमाह। केवलान्वयिनीति। केव लान्वयित्वग्रहदशायामित्यर्थः। केवलेति। केवलान्वयिसाध्यसमानाधिकरणमित्यर्थः। साध्यस्य केवलान्वयित्व

स्थाने साध्यसामानाधिकरण्यग्रहेऽप्यनुमितिरस्त्वतुल्या केवलान्वयित्वं साध्यविशेषणं तच्चान्योन्याभावप्रतियोगितानव
च्छेदकत्वं तथा चान्योन्याभावप्रतियोगितानवच्छेदकसाध्यसामानाधिकरण्यमित्यर्थः। ननु तथापीदं वाच्यं ज्ञेयत्वा
दिसाध्यकावसंभवः घटत्वादिविशिष्टवाच्यत्वादिमतोऽन्योन्याभावस्य प्रतियोगितावच्छेदकत्वा[illegible] वाच्यत्वादेर्विशिष्ट
तू४ स्यावच्छेदकत्वे विशेष्यस्याप्यवच्छेदकत्वात् तथा नवच्छेदकत्वं पर्याप्त्याख्यसंबंधेनावच्छेदकताभ्युपगमादिति वाच्यं।
घटत्वादिविशिष्टवाच्यत्ववान्न ज्ञेयत्वादिसाधनमिति भावः। वाच्यत्वस्य पर्याप्त्याख्यसंबंधेनावच्छेदकताभ्युपगमे तथापि घट
त्वविशिष्टवाच्यत्वस्यापि तथात्वात् विशिष्टवाच्यत्वस्य वाच्यत्वानतिरिक्तत्वादिति चेन्न अन्योन्याभावप्रतियोगिता
सामान्ये यद्धर्मावच्छिन्नपर्याप्त्यावच्छेदकताकत्वाभाववत्तद्धर्मावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात् तन्निष्ठप
र्याप्त्यावच्छेदकताभाववत्सामानाधिकरण्यमित्यस्तु न्यायविदं वाच्यं ज्ञेयत्वादित्यादौ वाच्यत्वादेः स्वरूपसतोऽभावप्रति
योगितानवच्छेदकत्वेन वाच्यत्वादिनिष्ठपर्याप्त्यावच्छेदकताप्रसि[illegible]ऽव्याप्त्यापत्तिस्ततोऽवच्छिन्नत्वानुधावनान्नवतया व्या० २

पित्वाद्यत्वादेः कालिकसंबंधेनान्योन्याभावप्रतियोगितावच्छेदकत्वात्संभवरनियाम्यं। साध्यतावच्छेदकसंबंधावच्छिन्न
त्वेनावच्छेदकताया विशेषणान्। वाच्यत्वादिनिष्ठस्वरूपसंबंधावच्छिन्नावच्छेदकत्वं तु संयोगादिसंबंधेन वा भावादेर
संताभावप्रतियोगितायामेव प्रसिद्धं साध्यतावच्छेदकसंबंधभेदेन व्याप्तेर्भेदात्तादात्म्यसंबंधेन प्रमेयादिसाध्यकेऽनुत्र भे ३
न्योन्याभावप्रतियोगितायाः सामान्यपतद्धर्मनिरूपणीयतावच्छेदकताकत्वाभावस्य तद्धर्मावच्छिन्नसामानाधिकरण्यमित्येव
वक्तव्यं। शब्दे च यस्यानुपादेयत्वात्। यद्धर्मपदं साध्यतावच्छेदकपरं। अवच्छेदकतायां च साध्यतावच्छेदकतावच्छेदकसंबं
धावच्छिन्नत्वेन विशेषणीया। तेन प्रमेयत्वादेः कालिकसंबंधेनान्योन्याभावप्रतियोगितावच्छेदकत्वेऽपि तादात्म्यसं
बंधेन प्रमेयादिसाध्यकेऽनासंभवः। तद्धर्मावच्छिन्नसामानाधिकरण्यं च साध्यतावच्छेदकसंबंधेन तद्धर्मावच्छिन्नस्य सं
बंधिनि यादृहेतुतावच्छेदकसंबंधावच्छिन्ना संबंधिता तन्निरूपकतावच्छेदकहेतुतावच्छेदकत्वं। अन्यसंबंधांतरेण साध्यसा एम॰
मानाधिकरण्यज्ञानेऽपि नानुमितिर्निर्वाह इदं वाच्यं गगनादि...समवायादिसंबंधेन गगनादिहेतुके इदं वाच्यं घटत्वपद ४९

त्तोप्ययस्मादिसाध्यकसमवायादिसंबंधेन विरुद्धोभयहेतुकेवातिव्याप्तिरिति भावः। व्यतिरेकिणीति। अन्वितिरेकित्वग
हदशायामित्यर्थः। व्याप्तिः परामर्शविषयाऽनुमितिप्रयोजिका व्याप्तिः। ननु एवं परस्परव्यभिचार इत्यत आह तथे
ति जनकत्वं परामर्शविषयतयावच्छेदकत्वं। केवलान्वयिसाध्यकानुमितौ निरुक्तकेवलान्वयिसाध्यसामानाधि
करण्यविशिष्टव्याप्तिपरामर्शो व्यतिरेकिसाध्यकानुमितौ च साध्यवदन्यावृत्तित्वपरामर्शो हेतुरित्यर्थः। केवलान्वयिसा म४
ध्यकत्वं च निरुक्तकेवलान्वयिसाध्यसामानाधिकरण्यविशिष्टव्याप्तिपरामर्शाव्यवहितोत्तरोत्पन्नत्वमेव तेनेदं वाच्यं हे
म४ यत्वादिसाध्यकावपि व्यतिरेकित्वभ्रमदशायां साध्यवदन्यावृत्तित्वमात्रपरामर्शादनुमितिसत्त्वेऽपि न व्यभिचारस्तत्र वस्तुतः नच
कृत्स्नकारणाबाधान्न भवत्येव तत्तदानीमनुमितिरिति वाच्यं। अनुभवविरोधात् तत्र व्याप्तिहेतुतावच्छेदकसंबंधादिभेदेन
निरुक्तसामानाधिकरण्यस्य विभिन्नतया परस्परं व्यभिचारस्य दुर्वारत्वाच्च। एवं साध्यवदन्यावृत्तित्वपरामर्शाव्यव
हितोत्तरोत्पन्नत्वमेव व्यतिरेकिसाध्यकत्वं। तेन व्यतिरेकिसाध्यके केवलान्वयित्वभ्रमदशायां निरुक्तकेवलान्वयिसाध्यसा

51

सि॰ टी॰
५०

मानाधिकरणपमात्रपरामर्शादनुमित्युत्पादेपि न व्यभिचारस्तदवस्थः। नापि हेतुतावच्छेदकसंबंधादिभेदेन साध्यवत्सा
वृत्तित्वस्यापि भिन्नतया परस्परं व्यभिचार इति भावः। ननु तर्ह्यनुमितिसामान्ये किं प्रयोजकमित्यत आह। अनुमितिमा
त्र इति पक्षधर्मतेव पर्वतादिनिरूपितासांसर्गिकविषयितेव निरूपितांतं स्वरूपकथनं न तु विशेषोऽननुगमापत्तेः। प्रयो
जिकाज्ञाने निष्ठतया कारणतावच्छेदिका। तथा चानुमितित्वावच्छिन्नं प्रति सामान्यतो विशिष्टज्ञानत्वेनैव हेतुत्वमिति
भावः। ज्ञानत्वेनैव हेतुत्वमिति विवक्षयानिः। विशिष्टत्वप्रवेशे प्रयोजनविरहात् गौरवात्मकारित्वविशेष्यत्वमादायवि
निगमनाविरहेणाकार्यकारणभावत्रयप्रसंगात्। नन्वेवं निरुक्तव्याप्तिहृदयज्ञानविरहदशायामपि धूमवान्पर्वत इत्या
दिपक्षधर्मताज्ञानादनुमितिसामान्योत्पत्तिः सामान्यसामग्रीसत्त्वादित्यत आह न चेति विशेषसामग्रीति। केवला
न्वयिसाध्यकानुमितिसामग्रीव्यतिरेकिसाध्यकानुमितिसामग्री च प्रकृते विशेषसामग्रीति भावः। सकलेति। यावद्विशेषसा राम॰
ध्यवत्त्वितदन्यावृत्तित्वपि त्यर्थः। साध्ये साकल्यविशेषणेऽपि तत्साध्याधिकरणाप्रसिद्धेः। तथात्वादिति। यावत्साध्यवन्य ५०

त्वादित्यर्थः। यावत्त्वावच्छिन्नप्रतियोगिताकान्योन्याभाववत्त्वस्य केवलान्वयित्वादिति भावः। इदमापाततः साध्यवत्ता
वच्छिन्नप्रतियोगिताकान्योन्याभाववद्वृत्तित्वं वक्तव्यं। सामान्याभावानभ्युपगमेपि। साध्यवत्तावच्छिन्नप्रतियो
गिताकान्योन्याभाववत्समानाधिकरणावृत्तित्वमेव वक्तव्यमित्युक्तदोषाभावात्। वस्तुतस्तु। सर्वत्रैव साध्ये केवलान्व
यित्वव्यतिरेकित्वग्रहदशाभेदेन कार्यकारणभावद्वयकल्पनमपे[illegible]लाघवाद्धेतुसमानाधिकरणाभावेत्यादिव क्ष्य ४
क्ष्यमाणव्याप्तिलक्षणमेव सर्वत्रैव हेतुतावच्छेदकस्योभयदशायामेव संभवात्। न च हेतुसमानाधिकरणपदवैयर्थ्ये
केवलान्वयिसाध्ये हेतुतावच्छेदकभेदेनानंतकार्यकारणभावापत्त्या तदपेक्षया कार्यकारणभावद्वयमेव लघु इति वाच्यं
। उक्तक्रमेण निरुक्तव्याप्तिद्वयस्यापि हेतुतावच्छेदकसामानाधिकरण्यघटिते साध्याधिकरणवृत्तितावच्छेदकहेतुता
वच्छेदकत्वस्य घटनाद्यपि साध्याभाववद्वृत्तितानवच्छेदकतादृशस्य न घोत्वादत्तेपि हेतुतावच्छेदकघटितत्वमिति तु
तद्भेदेन कार्यकारणभावभेदस्यावश्यकत्वात्। न च तथापि पक्षविषयविशेषव्यतिरेकित्वग्रहदशायां करापित्तत्रानु

घटिततया हेतुतावच्छेदक ३

52

मितिर्नैर्गत्यज्ञानत्रलाघवात्केवलान्वयिसाध्यसामानाधिकरण्यज्ञानेस्येवहेतुत्वंयुक्तमितिवाच्यंतत्राप्यभावेहेतुसामा
नाधिकरण्यानुपस्थितिदशायामनुमित्यनुदयाद्धेतुसामानाधिकरण्यांशज्ञानेस्यावश्यंहेतुत्वात्।अनुभ वापलाघ
लाघवात्सर्वत्रैवसाध्याभाववदवृत्तित्वज्ञानेसत्यनुमितिहेतुः।साध्यस्यकेवलान्वयित्वग्रहदशायांचानुमितिरेवासि
द्धेरसंभवकृतमुचितत्वादित्येवंदूषणंसारं।सर्वत्रलक्षणइतिसर्वत्रसाध्यसाधनघटितलक्षणइत्यर्थः।व्याप्तिनिरूप
णेइतिव्याप्तिघटितत्वेनेत्यर्थः।तदनुमितिजनकीभूतपरामर्शविषयतावच्छेदकव्याप्तिप्रतियोगित्वंहितदनुमितेःसा
ध्यत्वंतदाहरणव्याप्तिप्रतियोगित्वंतदनुमितेःसाधनत्वमितिभावः।ननुसाध्यत्वसाधनत्वमेतयोर्वनिर्वाच्यमित्यतआह।साध्यत्वंहि
ति।सिद्धिकर्मत्वमितितदनुमितिविधेयत्वंतदनुमितेःसाध्यत्वमित्यर्थः।सिद्धौविधेयेति।तदनुमितिजनकीभूतसिद्धापक्षवि
षयाविधेयतयाविषयत्वंतदनुमितेःसाधनत्वमित्यर्थः।।यद्यपिहेतोपिसिद्धावपिबोधंविनाप्यनुमितिस्तथापिसाध्येऽव्या
प्तिस्तथापिस्फुटत्वात्तद्व्येद्यदूषणांतरमाह।महानसीयवह्नाविति।वह्निव्याप्यधूमवान्पर्वतइतिसामान्यतःपरामर्शेण

तत्स्य महानसीयवह्न्यभावात्तत्र तद्व्याप्यासत्त्वप्रसंगः। एवं वह्निव्याप्यधूमवान्पर्वत इति सामान्यतः परामर्शेनैव प

जनितायां पर्वतीयवह्निमात्रविषयानुमितौ तत्सदनुमितिव्यक्तिविधेः पर्वतीयवह्न्यनुमितिर्जायतामिति सिषाध
यिषासहकाराज्जनितायां पर्वतो वह्निमानित्यनुमितिस्तु ज्ञानकीभूत सिषाधयिषाविषयत्वस्य महानसीयवह्न्या
द्यभावात्तत्र तत्साध्यत्वप्रसंगः इत्यर्थः। इदमुपलक्षणं साधनत्वमपि न सिद्धिकरणत्वं। लिंगकरणत्वस्यानि
रूपितत्वादित्यपि बोध्यं। यद्यपि वह्निव्याप्यधूमवान्पर्वत इति सामान्यपरामर्शात्पर्वतीयवह्निमात्रविषयकानुमिति
रेवासिद्धा सामग्र्याविशेषेण वह्नित्वरूपेण महानसीयादिवह्निभानेपि बाधकाभावात्। न च यत्र महानसीयवह्न्या
बाधज्ञानं तत्रैव सामान्यपरामर्शात्पर्वतीयवह्निमात्रभानसंभव इति वाच्यं। बाधज्ञानं हि किं वह्नित्वरूपेण तत्तद्वह्नि
त्वरूपेण पर्वतीयवह्न्यतिरिक्तवह्नित्वरूपेण वा। नाद्यः। तत्सत्त्वे पर्वतीयवह्नेरपि भानासंभवात्। नान्त्यो। समानधर्मका
रकबाधज्ञानस्यैव प्रतिबंधकतया तत्सत्त्वेपि वह्नित्वरूपेण महानसीयादिवह्निभानसंभवात्। अत एव पक्षवह्निव्या
प्यधूमवान्पर्वत इति सामान्यपरामर्शादेव पर्वतीयवह्न्यतिरिक्तवह्न्यभाववान्पर्वत इति बाधज्ञानसहकाराद्धीप

53

चि॰टी॰ कत्वानवच्छेदकपर्वतीयवह्नित्वप्रकारेणपर्वतीयवह्नेरनुमितित्वस्यापिवह्नित्वरूपेणसर्वस्यवह्नेरवगाहमानस्य
५१ मग्रीसत्वात्। अनुमितेर्हि विधेयविधयत्वस्येष्टत्वात्। अतएववह्निव्याप्यधूमवान्पर्वतोवह्निमानितिसिद्धान्तकप
रामर्शात्पर्वतीयवह्न्यतिरिक्तवह्न्यभाववान्पर्वतइतिबाधज्ञानसहकारेणपर्वतःपर्वतीयवह्निमानितिनानुमि
तित्वादृशबाधज्ञानजन्यानुमितेर्वह्नित्वादिव्यापकतावच्छेदकधर्मावच्छिन्नविधेयितानियमेनव्यापकसामग्रीवि
५५ रहात्। तथापियत्रोद्बोधकमहिम्नावह्नित्वरूपेणपार्वतीयवह्निमात्रविषयकस्मरणात्मकःपरामर्शस्तत्रैवसामान्य
५६ परामर्शात्पर्वतीयवह्निमात्रविषयकानुमितिसंभवः। विशेषणज्ञानाभावेनवल्यतरस्यानाक्रमणात्। नचविशेषणांशे
ऽप्यप्रकारकविशिष्टप्रत्यक्षंप्रतिविशेषणज्ञानस्यहेतुत्वेपिसर्वत्रविशिष्टबुद्धौतुहेतुत्वेमानाभावइतिवाच्यम्। सर्वत्र
विशिष्टानुभवएवविशेषणज्ञानंहेतुरितिसंप्रदायमतेनैतदभिधानात्। यद्वा। पर्वतीयवह्निकल्पनेलाघवंतस्यवह्नित्वक एम॰
ल्पनेचगौरवमितिगौरवज्ञानस्यपर्वतीयवह्न्यतिरिक्तसिद्धौप्रतिबंधकत्वात्तत्वदशायांप्रत्यक्षसामान्यपरामर्शादपिपर्व ५१

तीयवह्निमात्रविधेयकानुमितिसंभवः। केचित्तु पर्वतत्ववह्निव्याप्यधूमवान्पर्वतो वह्निमानिति मिश्रात्मकः परामर्शस्त
तः पर्वतीयवह्न्यनुमितिर्जायते। मितिविशेष्यविधानतत्त्रैव सामान्य[illegible] परामर्शादपि पर्वतीयवह्निमात्रविधेयकानुमि
तिसंभवः। किंतु प्रतिबंधकतयावह्नित्वं तदभावान्नासंभवादित्याहुः। तज्जवन्न। यदा वह्निव्याप्यधूमवान्पर्वत इति परामर्शः प
र्वतः पर्वतीयवह्नीनरूपभाववानिति बाधज्ञानं वा वर्त्तते तदा न पर्वतीयवह्नित्वेन पर्वतीयवह्नेर्भानमनुमितेर्व्यापक
तावच्छेदकधर्मप्रकारकत्वनियमादपि तु वह्नित्वरूपेणैव पर्वतीयवह्निमात्रभानं तद्धर्मावच्छिन्ने तद्बाधज्ञानस्य भिन्नप्रका
रकत्वेऽपि सामान्यरूपेण तद्धर्मावच्छिन्नविधेयकानुमितित्वावच्छिन्नं प्रत्यप्रतिबंधकत्वकल्पनादिति प्राची
६३ नमतमपि प्रैत्येवेदं दूषणमित्याहुः। तौ शप्राचीनमतविचारश्चास्मत्कृतसिद्धान्तरहस्येऽनुसंधेयः। इदं त्ववधेयं तादृशानु
मितिषु महानसीयवह्न्यादेः साध्यतायामिष्टापत्तेः सुकरत्वान्मूलोक्तमिदमसंगतमिति दिक्। तत्स्वार्थःस्थेहंकृते। न चेति। सा
मान्यतः सर्वाभिपदवाच्यत्वप्रकारेण परस्यानभ्वनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिरिति जिज्ञासोः परस्यहेतुपरीनत्रआमिल

सि·टी·
५३

स्मरणात्मकत्वरोत्। असाधकतां। अनुमितिप्रयोजकतां। उक्तव्याप्तीनामिति शेषः। तथा च किं व्याप्तिनिरूपणेनेति भावः।
स्वार्थेति। स्वस्मिन्नित्येतद्विशेष्यादेरित्यर्थः। प्रयोजनं यस्य एतादृशं यदनुमानं व्याप्तिज्ञानं विशेष्यादेर्व्याप्तिज्ञानमितिया
वत्। ननु प्रयोगिपदिदं व्याप्तिस्वरूपनिरूपणं नहि नेत्यर्थः। कथायामिति। स्वीयपक्षविशेष्यादेरित्यादि [illegible] कथाविचारः
। अपरेणाप्यवेगाः संभवात्। व्याप्तिनिरूपणं विना विशेष्यादेर्व्याप्तिज्ञानासंभवेन स्वपक्षवत्त्वास [illegible] स्येतु तत्परिचयस्यैवा
पाक्यन्यायाहेतत्वाहरणात्प्रयोगस्यैवासंभवादित्यर्थः। तथा च नकेवलं विप्रतिपन्नपक्षसमाधित्सया व्याप्तिनिरूपणमपि
तु विशेष्याणां व्याप्तिस्वरूपज्ञानं विना कथायामप्रवेशो न संभवतीत्येतदर्थमपीति भावः। व्याप्तिपूर्वपक्षरहस्यं। प्रतियो
ग्यसमानाधिकरणेति। यत्समंदहेतुमितपरं हि नीयं [illegible] पदसंदं साध्यतावच्छेदकपरं। प्रतियोगितावच्छेदकावच्छिन्नं प्रति
योगितावच्छेदकत्वरूपंपन्नं भवति। तेन समंसामानाधिकरण्यं तदवच्छिन्नेन सममेव सामानाधिकरण्यं न स्याद्हेतोर्व्याप्तिरिति एम०
योजना। तद्धर्मावच्छिन्नेन सह हेतोर्व्याप्तिरित्यर्थः। भवति च वह्निमान् धूमादित्यादौ धूमसमानाधिकरणात्यन्ताभा ५३

वप्रतियोगितानवच्छेदकं वह्नित्वं तदवच्छिन्नसमानाधिकरणो धूमः । धूमवान् वह्नेरित्यादौ च वह्निसमानाधिकरणात्यं
ताभावप्रतियोगितावच्छेदकमेव धूमत्वमिति नातिव्याप्तिः । प्रतियोगितावच्छेदकावच्छिन्नेत्यादि यथाश्रुतं तु न सं
गच्छते । वह्निमान् धूमादित्यादौ सर्वेषामेव वह्नीनां तादृशप्रतियोगितावच्छेदकतत्तद्वह्नित्ववह्निजलोभयत्वाद्यवच्छि
न्नत्वादसंभवापत्तेः । न चैवमपि वह्निसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकं प्रमेयत्वं तदवच्छिन्नधूम
समानाधिकरणो वह्निरस्तीति व्याप्तिरिति वाच्यं । व्यभिचारिण्यपि वह्न्यादेः प्रमेयत्वादिरूपेण धूमादेर्व्याप्यत्वापत्त्या अनुपग ला
मात् । धूमत्वेनैव हि धूमो न वह्निव्यापकः । प्रमेयत्वादिना तु व्यापको भवत्येव । सत्तावान् द्रव्यत्वादित्यादिव्यतिरेकिसा
ध्यके साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यसामान्याभावप्रसिद्ध्या व्यभिचारिण्यपि हेतुसमानाधिकरणत्वमत्यं
ताभावविशेषणं । तच्च हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नहेतोर्यदधिकरणं । तत्र येन केनापि संबंधेन व
र्तमानत्वं । अन्यथा द्रव्यं गगनं गगनत्वप्रकारकप्रमात्वादित्यादौ विशेष्यतासंबंधेन हेतुतायां समवायसंबंधेन हेत्वधिक

वि·टी· रणेनर्थात्मा निवर्त्तमानस्य गगनत्वसामान्याभावस्य प्रतियोगितावच्छेदकमेव गगनत्वत्वमित्यव्याप्तिः स्यात् । तस्या वृ-
५४ त्तेर्गुणकर्मान्यत्वविशिष्टसत्तादिस्थले हेतुभूतसत्ताधिकरणे वर्त्तमानस्य द्रव्यत्वसामान्याभावस्य प्रतियोगितावच्छे-
दकमेव द्रव्यत्वत्वमित्यव्याप्तिः । ननु हेतौ साध्यसामान्याभावप्रतियोग्यसामानाधिकरण्यविरहात् । प्रतियोग्यसमा-
नाधिकरणत्वस्य हेतोर्विशेषणत्वेनैवैनेतदव्याप्तिद्वयावकाश इति वाच्यं प्रथमे आत्म त्वरूपहेत्वधिकरणमादाय
द्वितीये गुणादिमादाय वक्ष्यमाणक्रमेण लक्ष्यमाणाद्विविधप्रतियोग्यसामानाधिकरण्यस्यैव साध्याभावस्य हेतौ
अ६ सत्त्वात् । न चानुपदं स्फुटीभविष्यति अधिकरणत्वं च संबंधित्वमात्रं । तेन नात्मादिवृत्तिनियामकसंबंधेन हेतुतायां हे-
तुतावच्छेदकसंबंधेन हेत्वधिकरणत्वाप्रसिद्ध्याव्याप्तिः । संबंधित्वं चेद्धर्मित्वान्न चेद्वृत्तिनियामकानियामकसं-
बंधमात्रनिरूपितं संबंधिमात्रसाधारणो धर्मधर्मिभावाख्यः स्वरूपसंबंधविशेषः । न त्वाधाराधेयभाववृत्तिः ॥ अत एव एम०
कटहीनासंसर्गिकधर्मधर्मिभावगोचरवैशिष्ट्यज्ञानत्वमिति मीमांसकाः । अथ घटस्य ज्ञानं चैत्रस्य धन- ५४

न्य०

मित्यादिविशिष्टत्वस्वत्वादिहेतुतानियामकसंबंधसंसर्गकविशिष्टसत्त्वक्षादौ न लक्षणगमः स्यादिति चेन्न हेतु-
तावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नहेतोरधिकरणत्वविवक्षणे हेतुतानियामकसंबंधेन हेतुतायामव्या-
प्तिलादृशहेतोः संबंधित्वमात्रविवक्षणे च द्रव्यं विशिष्टसत्त्वादित्यादावव्याप्तितादवस्थ्यं गुणादौ विशिष्टनिरू-
पिताधारताविरहेपि तत्संबंधितायाः सत्त्वादित्यपि निरस्तं। विशिष्टनिरूपिताधारतावच्छिन्नविशिष्टनिरूपिताधारताभि-
न्नापरनाम्न्याः संबंधिताया अविवक्षणे लयाद्गुणादावसत्त्वात्। समवायेन ... सत्त्वाद्द्रव्यत्वाद्यधिकरणे
महाकालादौ कालिकविशेषणतादिना वर्त्तमानस्य सत्तादिसाध्याभावस्य प्रतियोगितावच्छेदकमेव सत्तात्वा-
दिकमित्यव्याप्तिः। एवं कपिसंयोगी एतत्त्वादित्यादावव्याप्यवृत्तिसाध्यकेऽव्याप्तिश्च। साध्यसामान्याभावस्यापि निरू- दिसा
पकहेतुसमानाधिकरणत्वादतः प्रतियोग्यसमानाधिकरणेति। यत्पदार्थस्य हेतोर्विशेषणं। तथा च स्वप्रतियोग्य-
समानाधिकरणस्य हेतुतावच्छेदकावच्छिन्नहेतोर्हेतुतावच्छेदकसंबंधेन संबंधिनि येन केनापि संबंधेन वर्त्तमानो यो

56

चिं॰ टी॰

५५

ऽभाववत्त्वं प्रतियोगितानवच्छेदकं पदार्थः स्वपदमभावपरं। तत्र साध्यसाधनभेदेन व्याप्तिभेदाद्व्याप्यवृत्ति
साध्यकस्थले नेदं विशेषणं सफलं। अभावीयविशेषणतानामविशेषसंबंधेन साध्याभाववद्वृत्तिसाध्यीयप्रतियो
गितावच्छेदकत्वस्यानवच्छेदकसंबंधेन वा हेत्वधिकरणवृत्तित्वविवक्षणाद्वा साध्याभावस्य यथाकथंचि
त्संबंधेन हेत्वधिकरणवृत्तितामादाय व्याप्यवृत्तिसाध्यकस्थलेऽव्याप्तिवारणसंभवादिति वाच्यं। तथापि तादृशवि
शेषणानुपादाने साध्याभाववत्याभाववृत्तित्वभ्रमे हेतुसामानाधिकरण्यभ्रमेऽनुमितिस्तु स्यादतो हेतुसमाना
धिकरणाभावप्रतियोगितायां साध्यतावच्छेदकावच्छिन्नत्वग्रहे तादृशप्रतियोगितासामान्ये साध्यतावच्छेदका
वच्छिन्नत्वाभावग्रहासंभवात्। प्रकृतलक्षणे वक्ष्यमाणलक्षणान्तरे च विवक्षणीयत्वादिति भावः। स्वप्रतियोग्यसमा
नाधिकरणत्वं च न स्वप्रतियोग्यधिकरणे केनापि संबंधेन वर्त्तते यत्र इत्यत्र संयोगित्वादिस्वादावतिव्याप्तेः। स्वत्वा एम॰
पात्रधिकरणे द्रव्ये संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वात् किंतु स्वप्रतियोग्यधिकरणे केनापि संबंधेन व ५९

र्तमानत्वसामान्याभावः तथाच सामानाधिकरण्यस्य व्याप्यवृत्तित्वपर्याप्तत्वांगुणादावेव संयोगसामानाधिकरण्य
त्वाभाववत्त्वमतो नातिव्याप्तिः। एतेन इदं वा संज्ञेयत्वादिसाद्देना द्रव्याभाव एवाप्रसिद्धो यदभावप्रतियोगिसमा
व्या ४ नाधिकरणं ज्ञेयत्वमित्यपि निरस्तं। सामानाधिकरण्यस्य व्याप्यवृत्तितया सामान्यत्वाद्यभावस्यैव तादृशस्य प्र
सिद्धत्वात्। न चैवं वह्नेरव्याप्यवृत्तितया वह्निमान् धूमादित्यादावव्याप्तिः। हेतुसमानाधिकरणस्य साध्यसामा
न्याभावस्यापि धूमावच्छेदेन प्रतियोगिसामानाधिकरण्याभावस्य धूमादौ सत्त्वादिति वाच्यं। स्वप्रतियोग्य
सा ४ धिकरणे वर्तमानत्वसामान्याभावविशिष्टहेतुतावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबंधेनाधिकरणत्वस्यावि
वक्षितत्वात्। इत्थं च वह्निमान् धूमादित्यादौ वह्न्यादिसामान्याभावस्य प्रतियोग्यधिकरणवृत्तित्वाभावविशिष्टहेतु
तावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबंधेनाधिकरणमेवाप्रसिद्धमतोऽभावांतरस्यैव लक्षणघटकत्वान्नाव्याप्तिः
। केचित्तु। प्रतियोग्यसमानाधिकरणो यः संताभावविशेषणं। नचैवं कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिरस्य स्वा

57

वि॰ दी॰ संयोगी सत्त्वादित्यादावतिव्याप्तिवारणाय सामानाधिकरण्यस्याव्याप्यवृत्तित्वानुपगमावच्छेदकतया हेतुस
५६ मानाधिकरणकपिसंयोगाभावस्यापि गुणादौ प्रतियोग्यसमानाधिकरणत्वादिति वाच्यं । स्वप्रतियोग्यसमा
नाधिकरण्यविशिष्टेऽभावे हेत्वधिकरणवृत्तित्वस्य विवक्षितत्वादित्याशङ्क्य । तत्स्वरूप । विशिष्टस्यानतिरिक्ततया गु
णाधिकरणविशिष्टसत्तायां गुणादिवृत्तित्वे व प्रतियोगिसामानाधिकरण्याभावविशिष्टकपिसंयोगाभावस्यापि
तद्वृत्तित्वात् । तत्र हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभाववत्त्वं विवक्षितमेतन्मात्रे च तत् यै६
हेतुसमानाधिकरणपदमिति वाच्यं । कृत्स्नस्यैव कल्पनापत्तेः । तत्र तु प्रतियोगिसमानाधिकरणत्वेन प्रतियोग्यधि ७०
करणवृत्तित्वाभावः । सत्तायां गुणेन संयोगाभावप्रतियोगिसामानाधिकरण्यघटितप्रतीतेर्गुणादौ सत्ताविशिष्टतादृश
समानाधिकरणत्वस्यावच्छेदकतासंबन्धेनाधारविशेषकतया सामानाधिकरण्यस्याव्याप्यवृत्तित्वे मानाभावेन ए०
संयोगिसत्त्वादित्यादावतिव्याप्तेः । किन्तु प्रतियोग्यनधिकरणे येन केनापि संबन्धेन वर्तमानत्वं तादृशहेतुविशेषणं न त्व ५६

भावविशेषणं। कपिसंयोगी एतद्वृक्षत्वात् इत्यादावव्याप्तिर्नावकाश इति। हेतुसमानाधिकरणकपिसंयोगाभाव
स्याऽप्रतियोग्यनधिकरणगुणादिवृत्तित्वात् विशिष्टस्यानतिरिक्ततया प्रतियोग्यनधिकरणवृत्तित्वविशिष्ट
स्याभावस्य हेत्वधिकरणावृत्तितया विवक्षणेऽप्यनिस्तारात् [illegible] निरुक्तप्रतियोग्यनधिकरणवृत्तित्वस्य हेतुवि
शेषणत्वेऽपि वह्नेरव्याप्यवृत्तितया वह्निमान्धूमादित्यादावव्याप्तिः धूमादेर्धूमादिसमानाधिकरणवह्न्यादिसा
मान्याभावस्याप्रतियोग्यनधिकरणे धूमावयवादौ वृत्तेः कपिसंयोगी एतत्त्वविशिष्टसत्त्वादित्यादावव्याप्तेः
विशिष्टहेतुसमानाधिकरणोऽभावः कपिसंयोगसामान्याभावो विशिष्टस्यानतिरिक्ततया तत्प्रतियोग्यनधिक
रणगुणादिवृत्तिरपि हेतुतावच्छेदकविशिष्टहेतुत्वप्रतियोगितावच्छेदकत्वात् कपिसंयोगत्वस्येति वाच्यं। निरुक्त २२
प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेतौ हेतुतावच्छेदकसंबन्धेनाधिकरणत्वस्य विवक्षि
तत्वात्। एवं च वह्निमान्धूमात् कपिसंयोगी एतत्त्वविशिष्टसत्त्वादित्यादौ वह्निकपिसंयोगादिसामान्याभावस्य प्रति

ण्यनधिकरणवृत्तित्वविशिष्टहेतुतावच्छेदकविशिष्टहेतोर्हेतुतावच्छेदकसंबंधेनाधिकरणमेवाप्रसिद्धमिस् वि० टी
भावांतरस्यैव लक्षणाघटकत्वान्नाव्याप्तिः। स्वप्रतियोग्यनधिकरणं यद्धेतुतावच्छेदकसंबंधेन हेतुतावच्छे ५७
दकविशिष्टहेत्वधिकरणं तत्र येन केनापि संबंधेन वर्त्तमानो यो ऽभावस्तदभाववत्त्वं निष्कर्षः। प्रतियोग्यनधिक
रणहेत्वधिकरणस्यैव प्रतियोग्यनधिकरणवृत्तित्वविशिष्टहेत्वधिकरणतया वृत्तित्वपर्यंतप्रवेशो गौरवात्प्रयोज
नाभावाच्च। अत्र प्रतियोग्यनधिकरणत्वं प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगि
संबंधितदन्यत्वं। अन्यथा ज्ञानित्वादूष्मत्वाद्वह्निमान्धूमादित्यादौ समवायेन ज्ञानवन्न्यादेः साध्यतायामिदं वाच्यं ज्ञेय
त्वादित्यादौ कालिकसंबंधेन वाच्यत्वादेः साध्यतायां व्याप्त्यापत्तेः हेतुसमानाधिकरणस्य समवायसंबंधावच्छिन्न
ज्ञानवत्त्वाद्यभावस्य कालिकसंबंधावच्छिन्नवाच्यत्वाद्यभावस्य च विषयत्वसंयोगविशेषणताविशेषसंबंधेन प्रतियो ए०
ग्यधिकरणमेव हेत्वधिकरणमिति अभावांतरस्यैव नादृशाः। तत्प्रतियोगितानवच्छेदकत्वात्तदभाववह्नित्ववाच्यत्वादेर्गुण ५७

र्मान्यत्वविशिष्टसत्ताभावाज्ञाते ऽभूत्वत्वमूर्त्तत्वेऽप्येवान्मूर्त्तत्वादिसाध्यकावतिव्याप्त्यापत्ते श्चाहेतुसमानाधिकरण
स्य विशिष्टसत्तात्वावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिकरणमेव हेत्वधिकरणमित्यभा
वो नऽएवतादृशसत्ताप्रतियोगितानवच्छेदकत्वाद्विशिष्टसत्तात्वादेर्विशिष्टसत्तादिविशेषनियामकसंबंधेन घटादेः साध्य
तायां ज्ञानत्वादि [illegible] हेतौ विषयितासंबंधावच्छिन्न [illegible] घटाभावस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यधिक
करणाप्रसिद्धाः [illegible] तिर्हेतोरधिकरणत्वमपहाय संबंधितानुधावने केचिन्तु प्रतियोग्यनधिकरणत्वंदा
ध्यतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नस्य संबंधितद्व्यक्तितावच्छिन्नज्ञानवान्मत्त्वादिसाध्यकावतिव्या
प्तिवारणायेत्यादिराहुः न इत्थं हि विषयित्वकालिकविशेषणत्वादिसंबंधेन घटादेः साध्यतायां विसृज्ञानत्वमहाका
लत्वादिहेतावव्याप्त्यापत्तेः । हेत्वनावच्छेदकसंबंधेन हेत्वधिकरणस्य साध्यतावच्छेदकविषयितादिसंबंधेनाभावमात्र
स्यैव प्रतियोगिसंबंधितया तादृशाभावाप्रसिद्धेश्च प्रतियोगितावच्छेदकसंबंधेन तद्यात्वाभिधाने तु संबंधांतरावच्छिन्ना बं १

59

वि.टी. ५८

भावमादायैवप्रसिद्धिरित्यनुपदंवक्ष्यामः प्रतियोगितावच्छेदकावच्छिन्नत्वं च प्रतियोगितावच्छेदकतावच्छेद
कसंबंधेनबोध्यं। तेन गुणकर्मान्यत्वविशिष्टसत्तात्वादिना दोहेत्वधिकरणस्य गुणकर्मादेः स्वरूपसंबंधेन गु
णकर्मान्यत्ववतः सत्त्वादेः समवायसंबंधेनाधिकरणत्वेपि नातिव्याप्तिः। ननु तथापि प्रतियोगितावच्छेदकावच्छि
न्नो संबंधित्वं किं प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचित् संबंधित्वं प्रतियोगितावच्छेदकावच्छिन्नसा
मान्यासंबंधित्वं वा। प्रतियोगितावच्छेदकं पर्याप्त्यवच्छिन्नसामान्यासंबंधित्वं वा। [illegible]कपिसंयोगी एतद्वृक्ष
त्वादित्यादावव्याप्तिः। कपिसंयोगत्वावच्छिन्नपर्याप्तिकं यत्किंचित्कपिसंयोग्यसंबंधित्वादेतद्वृक्षस्यापि तथैव वह्निमान्धू
मादित्यादावसंभवः। एतन्न एवमभावोनास्ति यस्य प्रतियोगितावच्छेदकावच्छिन्नसामान्यासंबंधी हेतुसंबंधी पर्वतादिः
जलत्वाद्यभावनिरूपणाकरणाभावादिमेयस्याप्यधिकरणाभावत्वेनाधिकरणस्वरूपतया त्र्याकाशाभावादि
रपि जलत्वाद्यभावप्रतियोगीतत्संबंधित्वात्पर्वतादेः। [illegible]नन्वेवमत्वाद्यात्मकभावरूपाभाव एव नाहराः प्रसिद्ध इति रा० ५८

वायवं भावस्यापि स्वरूपानाधिकरणान्योन्याभावभिन्नत्वात्तदुक्तस्य चाधिकरणस्वरूपानतिरेकितयान्यो
न्याभावरूपप्रतियोगिसंबंधिहेतुसंबंधित्वात् । अन्योन्याभावाभावस्याधिकरणानतिरिक्तत्वेपि अन्योन्याभा
वान्योन्याभावस्याधिकरणस्वरूपानतिरिक्तत्वात् । न च नञ्नयेऽभावाधिकरणकाभावस्यान्योन्याभावस्य वा
धिकरणस्वरूपत्वाभावादसंताभावत्वनिरूपितप्रतियोगितावच्छेदकावच्छिन्नस्यान्यासंबंधित्वस्य विवक्षि
तत्वाद्दूनामप्रसिद्धिरितिवाच्यं ॥ तथापि समवैजात्यमेव भावरूपाणामभावरूपाणां वा अभावानां पूर्वक्षणा
दिप्रतिकविद्यमानत्वविशिष्टस्याभावासंताभावात्मकत्वस्य समवैसिद्धतया तादृशस्याभावरूपप्रतियोग्यधिकर
णमेव हेत्वधिकरणमिति प्रसिद्धेर्दुर्वारत्वात् । पूर्वक्षणादिवृत्तित्वविशिष्टानां घटादिवृत्तित्वविशिष्टानां वाज्ञ
लत्वाभावादीनामभावस्य विशिष्टजलत्वाभावादेः केवलजलत्वाद्यभावाद्यनतिरिक्तत्वात्तत्तद्घटत्वाद्यभा
वाद्घटत्वाभावत्वाद्यादिसाध्यादौ तादात्म्यसंबंधेनाभावादिसाध्यकेव्याप्तिः गोत्वादिरूपयत्किंचित्प्रतियोगितावच्छेद भा ४

60

दि॰ टी॰ ५९

कावच्छिन्नासंबंधिहेतुसंबंधिनिष्ठस्यगवादिभेदस्यप्रतियोगितावच्छेदकत्वाद्घटत्वाभाववत्वादेः आत्मनयेऽभा
वाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणस्वरूपानतिरिक्ततया गवादिभेदवर्त्तमानस्यघटत्वाभावादि
भेदस्य गवादिभेदस्वरूपत्वात्कपिसंयोगाभावेनाछेद्यात्मत्वक्षणत्वादिहेतावव्याप्तिश्चात्मत्वादिसमाना
धिकरणकपिसंयोगाभावाभावस्य कपिसंयोगस्य गुणसामान्याभावत्वरूपेण किंचित्प्रतियोगितावच्छेदकावृत्ति
त्वसामान्यासंबंधित्वादात्मादेरिति। मैवं स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनिरूढहे
तुसंबंधिनिष्ठाभावनिरूपिताया प्रतियोगितातदनवच्छेदकत्वस्य विवक्षितत्वात् स्वपदं प्रतियोगितापरं। इत्थं च
वह्निमान् धूमादित्यादौ जलत्वाद्यभावस्य जलत्वादिनिष्ठजलत्वत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्यैव तादृशरूपः प्रति
द्वाः प्रतियोगितावच्छेदकभेदेन प्रतियोगिताभेदात् नैकावच्छेदकत्वं वह्नित्वादिकमितिनासंभवः। घटत्वाभावो घटत्वा एम०
भावत्वादित्यादौ च घटत्वाभावत्वावच्छिन्नाघटत्वाभावनिष्ठागवादिभेदनिरूपिता प्रतियोगिताप्रसिद्धिर्न तादृशी। किंतु ५९

गवादिनिष्ठगोत्वाद्यवच्छिन्नतदीयप्रतियोगिताकभेदवत्ताद्रूप्यीतद्वनवच्छेदकमेवघटत्वाभावत्वमिति नाव्याप्तिः
एवं कपिसंयोगाभाववान्नात्मत्वादित्यादावपि कपिसंयोगाभावत्वावच्छिन्नो कपिसंयोगाभावनिष्ठकपिसंयोग
निरूपितप्रतियोगिताकभेदेन ताद्रूप्यं किं तु गुणादिसामान्याभावनिष्ठगुणसामान्याभावत्वावच्छिन्नतदीयप्र
तियोगिताकभेदेन ताद्रूप्यं तद्वच्छेदकमेव कपिसंयोगाभावत्वमिति नाव्याप्तिः। [illegible] स्यावच्छेदकसंब
न्धेन त्ववच्छेदकावच्छिन्नसामान्यासंबंधिनि[illegible]हेतुसंबंधिकायायाः प्रतियोगिता तदनवच्छेदकयादृशेव विव
क्षणीयं। अभावनिवेशेन प्रयोजनविरहादिति [illegible] नत्वं। ताद्रूप्यायाप्रतियोगिता तदनाश्रयोप[illegible]नसमवायानधिक ले ४
रणत्वमित्यत्रावसंभवः वह्निमान्धूमादित्यादौ सर्वेषामेव वह्नीनां तत्तद्वह्नित्वोभयत्वाद्यवच्छिन्नप्रतियोगिताकास्तादृ
रूपाश्रयत्वात्तो वच्छेदकेऽनुसरणे। [illegible]वमपि वह्निमा[illegible]न्धूमादित्यादावसंभवं वह्नित्वादेर्महानसीयत्वविशि
ष्टवह्नित्वाद्यवच्छिन्नप्रतियोगितायास्ताद्रूप्यात्रवच्छेदकेत्वात् विशिष्टस्यावच्छेदकत्वतद्रूपकेतयो विशेषव्याप्यवच्छे

61

वि॰ टी॰
६०

दकत्वात् अन्यथानवच्छेदकत्वं पर्याप्त्याख्यसंबंधेनावच्छेदकताशून्यत्वं तथा च वह्नित्वादिकं केवलं न महानसीयत्व
विशिष्टवह्नित्वावच्छिन्नप्रतियोगितापर्याप्त्यवच्छेदकतापर्याप्त्यधिकरणमतो नासंभवः। न चैवं तथापि दण्डिमान् दण्डिसं
योगादित्यादिना नानाव्यक्तिसाध्यतावच्छेदकस्थलेऽव्याप्तिः साध्यतावच्छेदकीभूतानां सर्वासामेव दण्डव्यक्तीनां च
लनीन्यायेन दण्डिसंयोगवन्निष्ठतत्तद्दण्डावच्छिन्नप्रतियोगिताकतत्तदभावप्रतियोगितापर्याप्त्यवच्छेदकता
पर्याप्त्यधिकरणत्वादिति वाच्यं। जात्येकदण्डोपाध्यतिरिक्तपदार्थस्य स्वरूपतोऽभावप्रतियोगितानवच्छेदकत्वपक्षे दण्ड
व्यक्तीनां पर्याप्त्याख्यसंबंधेनावच्छेदकतावत्वविरहात्। तत्र दण्डत्वस्याप्यवच्छेदककोटिप्रविष्टत्वादिति चेन्न तथा
सति महानसीयत्वविशिष्टवह्निमान् धूमादित्यादावतिव्याप्तिः। वह्नित्वस्य पर्याप्त्याख्यसंबन्धेनावच्छेदकताशून्यत
या महानसीयत्वविशिष्टवह्नित्वस्यापि तथात्वात्। महानसीयत्वविशिष्टवह्नित्वस्य वह्नित्वानतिरिक्तत्वेनानन्दण्डिमा
न्दण्डिसंयोगादित्यादावतिव्याप्तेश्च जात्येकदण्डोपाध्यतिरिक्तपदार्थस्य स्वरूपतोऽभावप्रतियोगितानवच्छेदकत्वमा ए॰
६०

साध्यतावच्छेदकीभूततद्दंडत्वव्यक्तेरविपर्य्यासात्स्वरूपसंबंधेन तादृशप्रतियोगितावच्छेदकताशून्यत्वादिति।। मैवं स्वाव
च्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्याभावसंबंधिनिरूपितहेतुसंबंधिकायायायाप्रतियोगितातत्प्रतियो
गितासामान्ये पक्षे स्वपर्याप्त्यवच्छेदकताकत्वाभाववद्धर्मावच्छिन्नसामानाधिकरण्यस्य विवक्षितत्वात् घट
पेन तद्रूपेणायस्य साध्यतावच्छेदकत्वं तन्न तेन रूपेण तदेव पक्षे मेधेदेनमास्तां इत्थं च वह्निमान्धूमादित्यादौ धूम
वन्निष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितायामहानसीयत्वविशिष्टवह्नित्वपर्याप्त्य
वच्छेदकताकत्वेपि शुद्धवह्नित्वस्यैव साध्यतावच्छेदकतया शुद्धवह्नित्वपर्याप्तावच्छेदकताकत्वविरहान्नासंभवः।
महानसीयत्वविशिष्टवह्निमान्धूमादित्यादौ च धूमवन्निष्ठमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभावप्रति
योगितायास्तादृशप्रतियोगितान्तर्गतायाः साध्यतावच्छेदकीभूतमहानसीयत्वविशिष्टवह्नित्वपर्याप्तावच्छेदक
ताकत्वान्नातिव्याप्तिः।। एवं तद्दंडिमान्दंडिसंयोगादित्यादौ दंडिसंयोगवन्निष्ठतद्दंडाभावप्रतियोगितायास्ताद

चि॰टी॰ राप्रतियोगितांर्गताया: भूद्दंडव्यक्तिपर्याप्तावच्छेदकताकत्वाभाववत्वेपितद्दंडत्वविशिष्टतदंडव्यक्तेरेवसाध्य
६१ तावच्छेदकतयानाद्दतात्द्दंडव्यक्तिपर्याप्तावच्छेदकताकत्वाभावात्तिव्याप्तिः।एतेनद्रव्यत्वव्याप्यजातिविशिष्टवान्द्र
व्यसमवायित्वादित्यादिनागजातिसाध्यतावच्छेदकस्थले व्याप्तिः साध्यतावच्छेदकीभूतानांसर्वासांद्रव्यत्व
व्याप्यजातीनांचालनीन्यायेनद्रव्यसमवायिनिवर्त्तमानस्वस्वरूपत: पृथिवीत्वजलत्वादिरूपद्रव्यत्वव्याप्यत
ज्जात्यवच्छिन्नप्रतियोगिताकाभावस्यप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वात्।जातिसंबंधोपाध्यतिरि
क्तपदार्थस्यैवस्वरूपतोऽवच्छेदकताननुगमादित्यपिपरास्तं।महानसीयत्वविशिष्टवह्निमान्धूमात्दंडिमान्दंडसं
योगादित्यादावतिव्याप्तिवारणायपर्याप्तिविवक्षायां:आवश्यकत्वेनतत्रवाप्यव्याप्तेर्निरस्तात्।स्वरूपत:पृ
थिवीत्वजलत्वाद्यवच्छिन्नप्रतियोगितायाद्रव्यत्वव्याप्यजातित्वविशिष्टपर्याप्तावच्छेदकताभावात्।नचैवंविषय व्या॰
ताप्रामाण्यगुणवान्पृथिवीत्वादित्यादौलघुसमानयतगुरुरूपेणसाध्यतायामव्याप्तिः।स्वरूपसंबंधरूपावच्छेद ६१

पृ॰ ३ पं॰ एतद्गुरुधर्मस्य ससाध्यतायामलक्ष्यत्वात् । अत एव गुरुधर्मेण कारणतावच्छेदकत्वनिरूपणीयतावच्छेदकत्वात् पं॰ २३

कत्वस्य संभवति लघुधर्मे गुरुत्वभावेन घ्राणग्राह्यगुणत्वनिष्ठावच्छेदकत्वाप्रसिद्धेः । लाघवादुद्भूतत्वस्यैव प्रतियो
गितावच्छेदकत्वात् । अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वमेवेशेषणाभावान्न ज्ञातेरिसाणावेवाव्याप्तेः । विशिष्टस्व
रूपतावच्छिन्नप्रतियोगितायामनतिरिक्तवृत्तित्वान्नत्वात्वादिति वाच्यं । लक्षणमनिर्मिधात्तेन रूपेण व्यापक
त्वविरहात् । यथोक्तव्यापकतायाश्च कारणतावच्छेदकत्वात् ॥ अन्यथा गुरुधर्मरूपेणापि व्यापकत्वकार्यव्यव
हितपूर्वत्वव्यापकतावच्छेदकान्यथासिद्धनिरूपकधर्मस्यैव कारणतावच्छेदकतया गुरुधर्मस्यापि कारणताव
च्छेदकत्वापत्तेः ॥ गुरुधर्मस्य कार्यतानवच्छेदकत्वेन तद्घटितव्यापकत्वस्य गौरवेण कार्यतापरार्थत्वविरहात् । वस्तुतस्तु
लघुसमनियतगुरुधर्मस्य शक्यतायामनवच्छेदकत्वेपि कंबुग्रीवादिमान्नास्तीत्याद्यबाधितप्रतीतेः प्रतियोगितायाः अ
वच्छेदकत्वमस्त्येव । नहि तत्प्रतीतेस्तत्प्रतियोगिकाभावमात्रं विषयः तथापि घटत्वं किंचिद्व्याप्तिस्तत्वेपि नाद्रणप्रतीत्या
पत्तेः गुरुधर्मस्य कारणतानवच्छेदकत्वं वाच्यमेव समनियतपूर्ववर्त्तिसद्भावादिवन्नोरवस्यापि स्वातंत्र्येणान्यथासि

63

= १ स्वरूपरूपधर्मस्यैवनकारणतावच्छेदकत्वमपितु तादृशधर्मवत्त्वरूपस्यातिरिक्तास्वंडरूपपदार्थस्य

चि॰टी॰ ६२

च्छिसंयोगस्यैकत्वात्तापद्वाकार्याभाववहितपूर्ववृत्तित्वव्यापकतावच्छेदकानु व्याप्तिश्च निरूपसंबंधविशेषरूपावच्छेदक
त्वेवेन एव कारणतावच्छेदकत्वमन्यथा चेल्लघुसमनियमगुरुधर्मस्य प्रतीतिबलाद्भावप्रतियोगितापि। स्वरूपसंबं
धरूपावच्छेदकत्वे भिन्नयोरनपायात्: कारणतायाः स्वरूपसंबंधरूपावच्छेदकत्वविरहादेव न कारणतावच्छेदकत्वं
। नचैवं दंडत्वादेर्लघुधर्मस्याधिकारणतापात्तादृशावच्छेदकत्वेमनाभावः। कारणतावच्छेदकधर्मवत्त्वेवकार
णतारूपत्वेन दंडत्वस्येव कारणतारूपतया स्वस्यैव स्वावच्छेदकत्वासंभवादिति वाच्यं। दंडत्वेन दंडकारणत्वमित्यादि
प्रतीतेरेवमानत्वात् प्रतीतिबलात् स्वस्यापि धर्मान्तरविशिष्टस्वावच्छेदकत्वाद्वेषेवतत्वे। न तु तथाप्यसंभवः। वह्निमा
-भमादित्सादेः धूमादिसमानाधिकरणचक्षुरादिघटान्योन्याभावप्रतियोगितापात्तादृशसमवायाद्यिद्यत्किंचित्संबंधाव
च्छिन्नवह्न्यादिसामान्यतानाभावप्रतियोगितापात्तादृशप्रतियोगितानर्गतापावह्निलोघवच्छेद्यत्वात्तानवस्थाप्य
तावच्छेदकसंबंधावच्छिन्नत्वेनप्रतियोगितासमकपोविशेषणीयाः। स्वावच्छेदकसंबंधेनेतिस्थाने साध्यतावच्छेद

पृथगेवाकारणतावच्छेदकत्वस्य १८

एम॰ ६२

कसंबंधेनेति वाच्यमपि न वाच्यं। तथा सति कालिकसंबंधेन घटादेः साध्यत्वे कालपरिमाणादिहेतावव्या
प्त्यापत्तेः। तत्र स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नासंबंधिनिरूपितहेतुसंबंधिकायाः साध्यतावच्छेदकका
लिकसंबंधावच्छिन्नप्रतियोगिताया: साध्यतावच्छेदककालिकसंबंधेन स्वावच्छेदकावच्छिन्नासंबंधिनिरूपित
हेतुसंबंधिकायां अप्रसिद्धत्वात्। निरूपितहेतुसंबंधिनो महाकालस्य कालिकसंबंधेन वृत्तिमन्मात्रस्यैवाधार
त्वात्। न च कालिकसंबंधावच्छिन्नगगनाद्यभावप्रतियोगितैव नाप्रसिद्धा। तस्याः स्वावच्छेदककालिकसं
बंधेन स्वावच्छेदकगगनत्वाद्यवच्छिन्नासंबंधित्वस्य हेतुसंबंधिमहाकाले सत्त्वात्। महाकालस्य गगनादिसंबंधि
त्वादिति वाच्यं। कालिकसंबंधेन गगनादेर्वृत्तिमत्त्वे महाकालस्य कालिकसंबंधेन गगनादेरपि संबंधित्वात्। ने
नसंबंधेन गगनादेर्वृत्तित्वे तेन संबंधेन गगनत्वाद्यवच्छिन्नसंबंध्येवाप्रसिद्धमिति कथं तथाविधकालिकसंबंधावच्छि क२
न्नगगनाद्यभावप्रतियोगिताप्रसिद्धिसंभवात्। किंच स्वत्ववान्विस्तरानत्वादिरूपो विषयितासंबंधेन वृ

64

वि·टी· यदि साध्यके विषयितासंबंधावच्छिन्नगगनाद्यभावप्रतियोगिताकाराप्यापि न प्रसिद्धिसंभवः। विषयितया गगना
६३ देरपि नित्यज्ञाने सत्त्वादिति मैवं स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधि निरूप्यहेतुसंबंधि
कप्रतियोगितासामान्ये साध्यतावच्छेदकसंबंधावच्छिन्नत्वघटकीभूतनिरूप्यपर्याप्त्यवच्छेदकत्वोभयाभाववत्त्वे हेतुमदवच्छि
न्नसामानाधिकरण्यस्य विवक्षितत्वात्। इत्थं च घटवान्कालपरिमाणादिसंयोगसमवायादिसंबंधावच्छिन्नघटा
द्यभावप्रतियोगिताकाराप्येव प्रसिद्धिः। एतेन घटत्वाभाववान् पटत्वादित्यादावव्याप्तिः। पटत्वसमानाधिकरणस्य
गोत्वाभावादेर्घटत्वाभाववन्निष्ठप्रतियोगिताया घटत्वाभावत्वावच्छेद्यत्वात्। अभावाधिकरणकाभावप्रतियोगिका
भावस्याधिकरणस्वरूपानतिरेकितया गोत्वाभावादिनिष्ठघटत्वाभावभेदस्य गोत्वाभावादिरूपत्वेन घटत्वाभाव
रूपापि गोत्वाभावादिप्रतियोगित्वात्। तत्प्रतियोगितावच्छेदकः स्वावच्छेदकतादात्म्यसंबंधेन स्वावच्छेदकावच्छिन्नासं ग०
बंधित्वस्यापि हेतुसंबंधिनि सत्त्वाच्चेति प्राचां दूषणमप्यपास्तं। तत्प्रतियोगितावच्छेदकः घटत्वाभावत्वावच्छेद्यत्वेपि सा ६३

त्वंधस्यप्रतियो
।२

ध्मतावच्छेदकसंबंधावच्छिन्नत्वाभावेनोभयाभाववत्वात् । अथैवमपि घटवन्निष्ठज्ञानत्वादिसाध्यकहेतौ वृत्तिनियाम
क[?]तानवच्छेदकत्वेन तत्र साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्याप्रसिद्धत्वात्तत्पदेन च वृत्तिनियामकविषयितादि वृ२
संबंधस्याभावप्रतियोगितानवच्छेदकत्वेपि घटवज्ज्ञानत्वताभावादेः प्रतियोगितावच्छेदकतावच्छेदकत्वमस्त्येवेस
भावप्रतियोगितावच्छेदकतायामेव तदवच्छिन्नत्वप्रसिद्धिरित्यस्य मते तत्वपि वृत्तिनियामकविषयितादिसंबंधेन साध्य
तायां घटवज्ज्ञानत्वादिसाध्यकावतिव्याप्तेर्वृत्तिनियामकसंबंधस्यत्वभावप्रतियोगितानवच्छेदकत्वेन ज्ञानत्वसमा
नाधिकरणाभावप्रतियोगितायां विषयितादिसंबंधावच्छिन्नत्वघटत्वाद्यवच्छिन्नोभयाभाववत्त्वादिति चेन्न वृत्तिनिया
मकसंबंधवद्वृत्तिनियामकसंबंधस्याप्यभावप्रतियोगितावच्छेदकत्वात् । नचैवमपि तादात्म्यसंबंधेन साध्यतायां घटो
द्रव्यत्वादित्यादावतिव्याप्तिः मूलोक्तलक्षणघटकेऽत्यन्ताभावपदस्य तत्वेनात्यन्ताभावत्वनिरूपितप्रतियोगिताया एवल
क्षणघटकत्वयान्नाद्यप्रतियोगितासामान्येन तादात्म्यसंबंधावच्छिन्नत्वघटत्वावच्छेद्यत्वोभयाभावसत्त्वादिति वाऽत्यन्तस

65

तामावस्यात्रप्रयोजनविरहेणानुपादेयत्वात्। न च तथापि संयोगादिसंबंधेन द्रव्यत्वादिसाध्यके द्रव्यं पृथिवीत्वादि
त्यादावतिव्याप्तिः। संयोगसंबंधावच्छिन्नद्रव्यत्वाभावनिरूपितप्रतियोगिताव्यक्तेः स्वावच्छेदकसंबंधेन स्वावच्छेदका
वच्छिन्नसंबंधेनाप्रसिद्धेः। किंत्वभावांतरीयप्रतियोगिताव्यक्त्यपेक्षया तत्र संयोगसंबंधावच्छिन्नत्वद्रव्यत्वत्वावच्छिन्न
त्वोभयाभावसत्त्वादिति वाच्यं। तदवच्छिन्नसामानाधिकरण्यदलेनैव तन्निरासात्। साध्यतावच्छेदकसंबंधेन तदवच्छि
न्नसंबंधिनि हेतुतावच्छेदकसंबंधेन संबंधित्वस्य तदर्थत्वात्। साध्यतावच्छेदकहेतुतावच्छेदकसंबंधघटितसाध्यसामा
नाधिकरण्यज्ञाने संबंधांतरेण साध्यसामानाधिकरण्यज्ञानेनानुमित्यनुदयात्। तादात्म्येन स्वविषयकसंबंधेन सा
ध्यत्वे हेतुत्वे चाव्याप्तिवारणाय अधिकरणत्वं वृत्तित्वं चाय हाय संबंधित्वप्रवेशः। न च तथापि व्यापकतालक्षणप्रतियो
गमेव स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामान्यासंबंधिनि रूढहेतुसंबंधिकप्रतियोगितासामान्ये साध्यता ए०
वच्छेदकसंबंधावच्छिन्नत्वयद्धर्मपर्याप्तावच्छेदकताकत्वोभयाभावः। तद्धर्मावच्छिन्नत्वं व्यापकत्वमित्यस्यैव व्यापक ९५

नालक्षणत्वात्। स्वप्रतियोगिताकरमितिवाच्यं। साध्यतावच्छेदकसंबंधेन संबंधित्वेष्टत्वेनापि व्यापकतालक्ष
णे विशेषणीयत्वात्। साध्यतावच्छेदकसंबंधाश्रयदृष्टित्वेन व्यापकतावच्छेदकधर्मो वा विशेषणीयः तेन द्रव्यत्वा
देः संयोगसंबंधेन प्रमेयत्वादिरूपेण पृथिवीत्वव्यापकत्वाभ्युपगमेऽपि न क्षतिः [illegible] प्रतियोग्यसामानाधिकरण्यघट
तु साध्यसामानाधिकरण्यसाध्यसामानाधिकरण्यदलद्वये सर्वत्रैव संबंधित्वप्रवेशोऽधिकरणत्वहानित्वयोः क्षाप्यप्रवेशात्
संयोगेन गगनादेर्द्रव्यत्वादिव्याप्यत्वं पृथिवीत्वादेः संयोगेन गगनादिव्याप्यत्वं च स्यात् पृथिवीत्वाधिकरणे संयोगेन
गगनाभाववसत्वेऽपि तत्र संयोगेन तदीयप्रतियोगितावच्छेदकावच्छिन्नसंबंधितादिति का[illegible]भिहलात्। [illegible]तावता
धूमादिव्यापकतावच्छेदकवह्नित्वाद्यवच्छिन्नसंयोगिसंयोगित्वादेरेवव्याप्तित्वपर्यवसितेनाद्रव्यसंयोगित्वस्य समवा
यसंबंधेन महाभावेऽपि चाण्यपिसत्वाद्गुणसमवायेनदर्शनापत्तेः मेयत्वव्यापकवह्निसामानाधिकरण्ये
स्य भवानुपपत्तेः इत्याकारकादपि वह्न्यनुमित्यापत्तिर्मायन्यायधूमत्वधर्मितानवच्छेदकेकव्याप्यत्वविषयमर्शस्यापत्तु मि

चि॰ दी॰ ६५ मितिहेतुत्वान्नचेष्टापत्तिः। समलिंगकवत्स्वनुमितेः सर्वसंयोगेऽप्यपरामर्शजन्यत्वनियमादिति चेन्न। तादृशसंयोगि
त्वादिरूपव्याप्तेः स्वघटकीभूतधूमत्वादिसंबंधेनेव ज्ञानमनुमितिहेतुः। नतु समवायादिसाक्षात्संबन्धेनेत्यभ्युपगमात्
त्। धूमत्वादेस्तत्संबन्धताचतादृशयद्धूमत्वसंबन्धेन तादृशमत्त्वावच्छिन्नधूमत्वसंबंधेन तद्वृत्त्यप्रमादनुमितिरिष्यत एव
केचित्तु। तादृशसंयोगिवृत्तिधूमत्वादिकमेव व्याप्तिः नतु तादृशसंयोगित्वादिमात्रं तादृशसंयोगिवृत्तिधूमत्ववद्गासमवा
न्यर्वत इति भ्रमपरामर्शाद्दनुमितिरिष्यत एवेत्याहुः। तत्सत्त्वाद्यवाद्धूमत्वादिसंबंधेन तादृशसंयोगित्वादेरेव व्याप्तित्व
स्योचितत्वात्। नतु तथापि कपिसंयोगी एतद्वृक्षत्वादित्यादौ व्याप्यवृत्तिसाध्यकेऽव्याप्तिः तत्वस्य समवायसंबंधावच्छिन्न
कपिसंयोगत्वावच्छिन्नप्रतियोगिताकाभावप्रतियोगितादृशप्रतियोगितासामान्यांतर्गतत्वेन तत्र साध्यतावच्छेदकसंबंधावच्छि
न्नत्वकपिसंयोगत्वावच्छेद्यत्वोभयाभावविरहात्। नच समवायावच्छिन्नकपिसंयोगत्वावच्छिन्नप्रतियोगिताकाभावः स्वावच्छे रा॰
दकसमवायसंबंधेन स्वावच्छेदककपिसंयोगत्वावच्छिन्नसंबंधिभिन्नमेवेत्यधिकरणमेव नद्वृक्ष इतिकुतस्तस्यास्तादृ ६५

शाखानियोगितान्तर्गतत्वमिति वा। कपिसंयोगस्याव्याप्यवृत्तित्वेन तदत्यन्ताभावस्येव तद्भिन्नत्वस्यापि मूलावच्छेदेन
वृक्षे सत्त्वात्। अव्याप्यवृत्तिमतोऽन्योन्याभावस्याप्यव्याप्यवृत्तित्वादिति चेन्न। कपिसंयोगादेरव्याप्यवृत्तित्वेऽपि तत्सं-
बन्धितानाव्याप्यवृत्तिता: कपिसंयोगत्वावच्छिन्नसंबन्धिभिन्नत्वेन तद्वत्त्वं इति ग्रन्थकृतोऽभिप्रायात्। अव्याप्यवृत्तेर-
पि नाभावस्याव्याप्यवृत्तित्वेऽपि तद्वदन्योन्याभावो नाव्याप्यवृत्तिरित्यभिप्रायाद्धा न चान्योन्याभावस्याव्याप्यवृत्तित्वा-
भिन्नत्वेनैव दृश्यमानत्वादिति मूलं च तदर्थः। तत्रात्र स्वावच्छेदकसंबन्धेन स्वावच्छेदकावच्छिन्नसंबन्धिभिन्नत्वेन हेतु-
संबन्धिनो न विशेषणीयाः। किन्तु निरुक्तहेतुसंबन्धिनिरवच्छिन्नवृत्तिमान्नयोऽभावः तत्प्रतियोगितासामान्ये स्वाधिकरणाव-
